सत्यमेव जयते

# INDIA NON JUDICIAL

## Government of National Capital Territory of Delhi

₹500

e-Stamp

| | | |
|---|---|---|
| Certificate No. | : | IN-DL21776324024161U |
| Certificate Issued Date | : | 21-Apr-2022 01:54 PM |
| Account Reference | : | IMPACC (IV)/ dl704103/ DELHI/ DL-DLH |
| Unique Doc. Reference | : | SUBIN-DLDL70410330603590853252U |
| Purchased by | : | CENTRAL SANSKRIT UNIVERSITY NEW DELHI |
| Description of Document | : | Article 5 General Agreement |
| Property Description | : | Not Applicable |
| Consideration Price (Rs.) | : | 0 (Zero) |
| First Party | : | RFR PRATISHTHAN NAGPUR |
| Second Party | : | CENTRAL SANSKRIT UNIVERSITY NEW DELHI |
| Stamp Duty Paid By | : | CENTRAL SANSKRIT UNIVERSITY NEW DELHI |
| Stamp Duty Amount(Rs.) | : | 500 (Five Hundred only) |

सत्यमेव जयते

₹500

IN-DL21776324024161U

Please write or type below this line

NOTARY J.K. Sharma Advocate Delhi Regd. No. 1015 Expiry 17-11-2025 GOVT. OF INDIA

Notary Register Entry No 5336
Date 21 APR 2022

Research For Resurgence Foundation (RFRF) NAGPUR

**Statutory Alert:**

1. The authenticity of this Stamp certificate should be verified at 'www.shcilestamp.com' or using e-Stamp Mobile App of Stock Holding. Any discrepancy in the details on this Certificate and as available on the website / Mobile App renders it invalid.
2. The onus of checking the legitimacy is on the users of the certificate.
3. In case of any discrepancy please inform the Competent Authority.

# सांविदी

तपोमूलं हि साधनम्
Research is the Root of all Quest

**पुनरुत्थापकानुसन्धानप्रतिष्ठानम्, नागपुरम्**

**अथ च**

**केन्द्रीय-संस्कृत-विश्वविद्यालयः, नवदेहली**

**उभयोः**

Notary Register Entry No. 5336
Date 21 APR 2022
NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA
Research For Resurgence Foundation NAGPUR (RFRF)
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

पञ्चशत्या रूप्यकाणां मुद्रापत्रम्

पुनरुत्थापकानुसन्धानप्रतिष्ठानविस्तारकेन्द्रस्य स्थापनार्थम्

# पुनरुत्थापकानुसन्धानप्रतिष्ठानम्, नागपुरम्

अथ च

## केन्द्रीय-संस्कृत-विश्वविद्यालयः,
## 56-57 इन्स्टीट्यूशनल एरिया, जनकपुरी,
## नई दिल्ली-110058

अनयोः

# सांविदी

NOTARY J.K. Sharma Advocate Delhi Regd. No. 1015 Expiry 17-11-2025 GOVT. OF INDIA

**सांविदीयं वि.सं. 2079 तमे वर्षे वैशाखमासे कृष्णपक्षे षष्ठ्यां तिथौ तदनुसारं मईमासे 21 दिनाङ्के 2022 तमे वर्षे ( 21.04.2022 ) नवदेहल्यां निर्मिता क्रियान्विता चास्ति।**



Research For Resurgence Foundation (RFRF) NAGPUR

R.K. Barman

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

**प्रथमपक्षः**-पुनरुत्थापकानुसन्धानप्रतिष्ठानम्,शेषाद्रिसदनं, महालयं, तुलसीबागमार्गः, नागपुरं, महाराष्ट्रम् ४४००३२, भारतम् भारतीयशिक्षणमण्डलेन प्रतिष्ठापितं स्वतन्त्रं प्रतिष्ठानमिदम्।

अथ च

**द्वितीयपक्षः**- केन्द्रीय-संस्कृत-विश्वविद्यालयः (पूर्वतनं राष्ट्रिय-संस्कृत-संस्थानम्, मानित-विश्वविद्यालयः), 56-57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-110058, भारतम्, भारतसर्वकारेण शिक्षाविभागेन प्रतिष्ठितः,

पुनरुत्थापकानुसन्धानप्रतिष्ठानम्, केन्द्रीय-संस्कृत-विश्वविद्यालयः (इतः परं व्यक्तिगतरूपेण चेत् पक्षशब्देन एकवचनान्तेन सामूहिकरूपेण चेत् पक्षशब्देन द्विवचनान्तेन सन्दर्भितौ स्तः।) च इत्येतौ उभौ पक्षौ एतत् संविज्ज्ञापके वर्णितानुच्छेदानुसारं सहयोगस्य अधोलिखिताशये अनुमतौ स्तः।

**अनुच्छेदः-१ भूमिका उद्देश्यञ्च**

**१.१.भूमिका**

**१.१.१प्रथमपक्षस्य**

NOTARY
J.K. Sharma
Advocate
Delhi
Expiry 17-11-2025
GOVT. OF INDIA



Research For Resurgence Foundation (RFRF) NAGPUR

R.K. Barman

Central Sanskrit University, Delhi
56-57, Institutional Area, Janakpuri, New Delhi-58
Under MHRD, Govt. of India

क) पुनरुत्थापकानुसन्धानप्रतिष्ठानस्य (इतः परं 'आरएफआरप्रतिष्ठानम्' इति नाम्ना सन्दर्भितस्य) स्थापना स्वयंसेवकसंघटनेन कृता। आरएफआरप्रतिष्ठानस्य मुख्यमुद्देश्यं भारतीयज्ञानपरम्परायाः, दर्शनस्य, प्रयोज्यतायाः निश्चयं विधाय अनुसन्धानपरिणामेषु, अनुसन्धानपद्धतिषु, अथ च नवाचाराधारितप्रौद्योगिकीषु भारतीयादर्शस्थापनमस्ति।

ख) आरएफआरप्रतिष्ठानस्य क्रियात्मकायामः अनुसन्धानस्य, शोधकर्तृणां, संसाधनानां, तत्प्राप्तेश्च सुदृढीकरणं व्यवस्थापनञ्चास्ति।

ग) आरएफआरप्रतिष्ठानम् एकं बहुक्षेत्रीयानुसन्धानप्रतिष्ठानं वर्तते। इदं शैक्षिके औद्योगिके च क्षेत्रे अनुसन्धानैः तत्सम्बद्धक्रियाकलापैश्च सम्बद्धमेकं सम्पर्कजालं विस्तारयति।

अथ च

### १.१.२. द्वितीयपक्षस्य

क) केन्द्रीय-संस्कृत-विश्वविद्यालयस्य (इतः परं के.सं.वि. इति नाम्ना सन्दर्भितस्य) स्थापना आभारतं संस्कृतस्य प्रचाराय प्रसाराय च 2020 तमस्य वर्षस्य एप्रिल मासस्य 30 दिनाङ्के जाता। अयं च विश्वविद्यालयः भारतसर्वकारेण पूर्णरूपेण वित्तीयानुदानितो विद्यते तथा संस्कृतस्य प्रचारप्रसारार्थं शीर्षनिकायत्वेन कार्यं करोति। संस्कृतशिक्षणस्य अनुसंधानस्य च विकासः तथा प्रोत्साहनं च केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यम् उद्देश्यं विद्यते। एवमेव अयं विश्वविद्यालयः सम्बद्धानां सर्वेषां परिसराणाम् आदर्शसंस्कृतमहाविद्यालयानां/शोधसंस्थानानाञ्च प्रबन्धनार्थं केन्द्रीयप्रशासनिकासमन्वयरूपेण कार्यं करोति। भारतसर्वकारद्वारा संस्कृतशिक्षाविकासाय स्वीकृतानां विभिन्नयोजनानां कार्यक्रमाणां च क्रियान्वयनमपि अयं विश्वविद्यालयः करोति।



Research For Resurgence Foundation (RFRF) NAGPUR
R.K. Barman
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India
NOTARY J.K. Sharma Advocate GOVT. OF INDIA

संस्कृतभाषा सर्वासां भारतीयभाषाणां विकासाय तथा भारतीयसंस्कृतेः रक्षणाय च महत्त्वपूर्णा भूमिकां निर्वहति। संस्कृतभाषारक्षणं विना भारतीयभाषाणां विकासः भवितुं नार्हति। संस्कृतं ज्ञान-विज्ञानाभ्यां सैद्धान्तिकम् आधारं प्रददाति। भारतस्य समग्रविकासाय संस्कृतभाषायाः रक्षणं प्रचारश्च अवश्यं भवेत्। इदं दायित्वं निर्वहता भारतसर्वकारेण अस्य विश्वविद्यालस्य (पूर्वतनराष्ट्रियसंस्कृतसंस्थानस्य) स्थापनाय अनुशंसनं कृतम्। तदनुसारं 1970 तमे वर्षे सोसाईटि-पञ्जीकरणाधिनियमः 1860 इत्यस्य अनुगुणं पञ्जीकृतस्वायत्तसंघटनरूपेण समग्रे देशे विदेशे च संस्कृतस्य प्रचाराय प्रसाराय संरक्षणाय च राष्ट्रियसंस्कृत-संस्थानस्य स्थापनम् अभूत्। ततः उच्चमाध्यमिकशिक्षाविभागः, मानवसंसाधनविकासमन्त्रालयः, शास्त्रीभवनम्, नवदेहली अधिसूचनाक्रमाङ्कः 9-28/2000-U, दिनाङ्कः 07 मई 2002 इत्यस्य अनुगुणं विश्वविद्यालयानुदानायोगस्य अनुशंसनया राष्ट्रियसंस्कृतसंस्थानं मानितविश्वविद्यालयत्वेन उद्घोषितम्।

ख) केन्द्रीयसंस्कृतविश्वविद्यालयः स्वोद्देश्यस्य प्राप्त्यर्थं सर्वकारस्य विभिन्नयोजनानां/कार्यक्रमाणां निष्पादनाय अधोलिखितगतिविधीन् संचालयति। यथा-

- विभिन्नराज्येषु परिसराणां स्थापना
- माध्यमिक-पूर्वस्नातक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।
- स्नातक-(शिक्षाशास्त्रम्/बि.एड.)स्नातकोत्तर-(शिक्षाचार्य/एम्.एड.)स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।
- संस्कृत-सम्बद्धानां विभिन्नविषयाणां शोधकार्यार्थं प्रोत्साहनम्।
- संस्कृतस्य प्रचाराय मानवसंसाधनविकासमन्त्रालयस्य योजनानां कार्यान्वयनम्।
- संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयानां च स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णपुस्तकानां प्रकाशनम्।
- संस्कृताध्ययनार्थं पत्राचारपाठ्यक्रमस्य संचालनम्।



NOTARY J.K. Sharma Delhi Expiry 17-11-2025 GOVT. OF INDIA
Research For Resurgence Foundation (RFRF) NAGPUR
Central Sanskrit University, Delhi, 56-57, Institutional Area, Janakpuri, New Delhi-58, Under MHRD, Govt. of India

ग) केन्द्रीय-संस्कृत-विश्वविद्यालयः एकः बहुपरिसरीयो विश्व-विशविद्यालयो वर्तते यस्य द्वादश परिसराः, शताधिकाः महाविद्यालयाः/आदर्श संस्कृत-महाविद्यालयाः/शोधसंस्थानानि भारतवर्षे विभिन्नेषु स्थानेषु सञ्चालिता भवन्ति। संस्कृतस्य विकासाय विभिन्नयोजनानां परियोजनानां निर्माणाय क्रियान्वयनाय च केन्द्रीयसंस्कृतविश्वविद्यालयः मानवसंसाधनविकासमन्त्रालयस्य सहायताम् आचरति। एवमेव भारतशासनेन 1956 तमे वर्षे संघटितस्य संस्कृतायोगस्य संस्कृतविषयकानुशंसानां क्रियान्वयने अपि प्रमुखं दायित्वं निर्वहति।

**१.२.उद्देश्यम्** -

आरएफआरप्रष्ठिानम् केन्द्रीय-संस्कृत-विश्वविद्यालयः च अनुसंधाने शैक्षिक- सुविधासु च परस्परं सम्बलं दातुं पारस्परिकसहयोगेन उभौ मिलित्वा कार्यं कर्तुं रुचिमादधाते, येन विद्यार्थिषु शिक्षकेषु च अनुसन्धान-नवाचार-रचनात्मकतानां पोषणेन सह आचार्यच्छात्रौ परस्परं लाभान्वितौ भवितुं शन्कुयाताम्। उभौ पक्षौ उपर्युक्तोद्देश्यपूर्तये उभयोः संस्थानयोः ज्ञानस्य संसाधनस्य च परस्परं समर्पणरूपस्य दीर्घकालिकलक्ष्यस्य प्राप्तये संविदमिमां कुरुतः, येन स्वस्वक्षेत्रे संयुक्तदायित्वनिर्वहणं कृत्वा क्रियाकलापञ्चानुष्ठायानुसन्धानक्षेत्रे उत्कृष्टताप्राप्तये सुदृढशैक्षणिकसहयोगं कर्तुं सहमतौ अभूताम्। अस्यानुबन्धस्य द्वितीयानुच्छेदवर्णितसंसाधनानि, ज्ञानं, मनुष्यबलञ्च सहयोगक्षेत्रत्वेन वर्णितानि सन्ति।

## अनुच्छेदः-२ सहयोगक्षेत्रम्

भारते वैज्ञानिकप्रौद्योगिकसांस्कृतिकविकासे, नवाचारोद्यमितापारिस्थितिकतन्त्रे च अनुसन्धानं शक्तिशालि सुव्यवस्थितं च कर्तुम् अस्या संविद उद्देश्यं पूर्णं कृत्वा प्रभाविकुशलप्रबन्धनायोभौ पक्षौ एतद्द्वाराधोलिखितविन्दुषु सहयोगात्मकतया कार्यं कर्तुं सहमतौ स्तः। उपर्युक्तयोः पक्षयोर्मध्ये पारस्परिकसहमतक्रियाकलापा निम्नलिखिताः सन्ति-



Research For Resurgence Foundation (RFRF) NAGPUR
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India
NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA

## २.१ केन्द्रीय-संस्कृत-विश्वविद्यालयस्य दायित्वं कार्यञ्च

२.१.१.शैक्षणिकपरिसरे कार्यात्मकस्य आरएफआरप्रतिष्ठानविस्तारकेन्द्रस्य स्थापना तत्प्रयोजनानि च-

क)आरएफआरप्रतिष्ठानसम्बन्धिनां कार्याणां सुविधानामवसराणाञ्च विषये जागरूकता, प्रचार: सामर्थ्यम्।

ख)अनुसन्धानक्रियाकलाप-कार्यक्रम-संगोष्ठी-कार्यशाला-सम्मेलन-वाक्यार्थसभा-प्रतियोगितादीनां संयुक्ततत्त्वावधाने आयोजनं तद्विषये जागरूकता, प्रचारः समर्थ्यम्।

ग) 'पुनरुत्थान'स्य अवधारणां प्रति दार्शनिकस्वीकृतिः, उत्तरदायित्वञ्च।

घ) सांस्थानिकस्तरे विद्यावारिधि-विशिष्टाचार्य-स्नातकोत्तर-स्नातक-माध्यमिक-प्राथमिक- परियोजना-शोधप्रविध्यादिविभिन्नकार्यक्रमेषु राष्ट्रिय- सामाजिक स्थानीयावश्यकतापूर्तये अनुसन्धानप्रयोज्यताया मानकानां निरीक्षणं, नष्पादनं, मूल्याङ्कनञ्च।

ङ) निखिलविश्वे प्रचलितशिक्षणप्रणालीनां प्रोन्नयनाय भौतिक-मानवसंसाधनयोः शक्तिमादर्शञ्च भारतीयमानकेषु परिवर्तनाय मञ्चस्थापना।

च) राष्ट्रियशिक्षानीतेः कार्यान्वयनक्रमे संस्कृतविश्वविद्यालयानां बहुविषयकत्वसम्पादनाय नूतनपाठ्यक्रमनिर्माणं कार्यान्वयनञ्च।

छ) संस्कृतविश्वविद्यालयानामन्त:सम्बन्धस्थापनेन सह आभियान्त्रिकविश्वविद्यालयै: सह समकक्षता-साहचर्यादिसम्पादनाय, नीति-पाठ्यक्रमनिर्माणादिक्रियाकलापाय च वेदिका-स्थापना।

२.१.२. पारस्परिकसहमत्या स्थानीय-राष्ट्रियान्ताराष्ट्रियाणां शैक्षणिककार्यक्रमाणामायोजनम्।



Research For Resurgence Foundation (RFRF) NAGPUR
R.K. Barman
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India
NOTARY J.K. Sharma Advocate Delhi GOVT. OF INDIA

२.१.३. आरएफआरप्रतिष्ठानेन समायोज्यमानेषु विभिन्नकार्यक्रमेषु उपलब्धभौतिक-शैक्षणिक-यान्त्रिकसहायताप्रदानम्।

२.१.४. छात्राणां शिक्षकाणाञ्च विनिमयकार्यक्रमाणां प्रोत्साहनं समर्थनञ्च।

२.१.५. आएफआरसंस्थानस्य शैक्षणिकौद्योगिकसहयोगिनां सम्माननं गरिमरक्षणञ्च।

२.१.६. आएफआरसंस्थानेन समायोजितेषु सहयोगिसदस्यानां वार्षिकोपवेशनेषु सक्रियभागग्रहणम्।

२.१.७. विद्यावारिधये विद्यावाचस्पतये तदतिरिक्तशोधेभ्यश्च आरएफआरप्रतिष्ठानाय कार्यस्थलरूपेण मान्यताप्रदानम्।

२.१.८.आरएफआरप्रतिष्ठानस्य संकायसदस्यान् विश्वविद्यालयीयसम्मानितसंकायसदस्यरूपेण मान्यताप्रदानम्।

## २.२. आरएफआरप्रतिष्ठानस्य दायित्वं कार्यञ्च

२.२.१.केन्द्रीय-संस्कृत-विश्वविद्यालयं, 'शैक्षणिकसहयोगी' इति पदवीदानं प्रमाणीकरणञ्च।

२.२.२.आरएफआरसंस्थाया ज्ञानं संसाधनञ्च आरएफआरकेन्द्रं यावत् प्रापणम्।

२.२.३ केन्द्रीय-संस्कृत-विश्वविद्यालयं राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे च औद्योगिक-शैक्षणिकरूपेण केवलशैक्षणिकरूपेण वा अन्यसंस्थाभिः सह सम्बद्धताया अवसरप्रदानम्।

२.२.४.पुनश्चर्यापाठ्यक्रम-भिविन्यासपाठ्यक्रम-शोधप्रविधिकार्यक्रम-संकायविकासकार्यक्रमाणां सञ्चालने सहायताप्रदानम्।

२.२.५.सहमतक्षेत्रे अनुसन्धानगतिविधीनां प्रोत्साहनम्।



NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA
Research For Resurgence Foundation (RFRF) NAGPUR
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

२.२.६. आरएफआरप्रतिष्ठानेन भारतीयशिक्षणमण्डलेन च समायोजितकार्यक्रमेषु (अतिथीनां सीमितसंख्यया) विशेषत आमन्त्रणम्।

२.२.७. आरएफआरप्रतिष्ठानस्य प्रवेशवीथ्यां केन्द्रीय-संस्कृत-विश्वविद्यालयस्य विषये तत्र विज्ञापितविषयाणां वा प्रदर्शनं सूचनं च।

२.२.८. समन्वयसभायां सहयोगिसंस्थाभ्यो द्वयोः पदस्थप्राधिकारिणोः सहायतार्थ नामाङ्कनञ्च।

२.२.९. विभिन्नानुसन्धानगतिविधीनां निष्पादन-निरीक्षण-मूल्याङ्कनेषु सहायता।

२.२.१०. ज्ञानसंसाधनकेन्द्रस्य प्राप्तौ उपयोगे च सम्मेलनेषु विशिष्टशैक्षणिकसहयोगिभ्यः ह्रन्यूनीकृतशुल्कव्यवस्थाप्रदानम्।

२.२.११. ह्रसितशुल्केन छात्रेभ्यः संकायसदस्येभ्यश्च सुविधाप्रदानम्।

२.२.१२. संस्थायाः शैक्षणिक-प्राशासनिक-लेखापरीक्षणकार्यक्रमेषु परामर्शः, निष्पक्षमूल्याङ्कञ्च।

२.२.१३. सहयोगिसंस्थया आयोज्यमानेषु अनुसन्धानादिशैक्षणिककार्यक्रमेषु अन्यसहयोगिसंस्थानां सूचना आमन्त्रणञ्च।

२.२.१४. राष्ट्रियशिक्षानीतेः क्रियान्वयनाय सर्वविधसहायताप्रदानेन सह प्राचीनस्य नवीनस्य वा संस्कृतभाषानिबद्धज्ञानस्य रक्षण-प्रकाशन-प्रवर्धनार्थमपेक्षितसर्वविधक्रियाकलापानामनुष्ठानम्।

**अनुच्छेदः-३ समन्वयः सम्पर्काधिकारी च**

NOTARY J.K. Sharma Advocate Delhi Regn. No. 1015 Expiry 17-11-2025 GOVT. OF INDIA



Research For Resurgence Foundation (RFRF) NAGPUR

R.K. Bansal

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

उभे संस्थे परस्परं निर्णीय सम्पर्काधिकारिणमवधारयिष्यतः। अस्याः संविदः कार्यान्वयनस्य दायित्वं सम्पर्काधिकारिणो भविष्यन्ति। पक्षयोश्च सहमत्या विधयोऽनुष्ठास्यन्ते।

**अनुच्छेदः-४ कार्यक्षेत्रम्**

प्रकृतौ सहयोगस्य क्षेत्राणि अनन्तानि सन्ति इत्यत्रोभौ पक्षौ सहमतौ स्तः। अतः सहयोगक्षेत्रविस्ताराय सद्भावपूर्वकं विस्तरेण वार्ताः करिष्यतः, येन अत्रोक्तातिरिक्तेषु सहयोगक्षेत्रेषु सहमतौ भवितुं शन्कुतः। तदा सहयोगस्य प्रत्येकं क्षेत्रस्य विषये पक्षयोरधिकार-दायित्वादीनि निर्धारयिष्यतः। उभौ पक्षौ समये समये अस्यां सांविद्यां परिशिष्टानि संशोधनानि वा योजयितुं शक्नुतः येन षष्ठानुच्छेदस्य तृतीयधारानुसारं सहयोगस्य चर्चाया वाऽतिरिक्तकार्यक्षेत्रं सम्मेलयितुं शक्यते।

**अनुच्छेदः-५ अवधिः**

इदं संविज्ज्ञापकं हस्ताक्षरणदिनाङ्कतः पञ्चसावनवत्सरं यावद् वैधं स्थास्यति। तत्पश्चात् परिवर्तितपरिस्थितिविशेषस्यालोके एतत्संविज्ज्ञापकीयसहमतविषयाणां निश्चयपूर्वकं लिखितसहमत्या संविदमिमामनुवर्तयितुं शन्कुतः। अननुवर्तनीयविषयेषु पक्षौ सांविद्यां परिवर्तनाय सहमतौ भवितुं शन्कुतः।

**अनुच्छेदः-६ नियमाः**

**६.१. वित्तम्**

उभौ पक्षौ सहयोगक्षेत्रे येन प्रकारेण प्रत्येकं कार्यक्रमस्य दायित्वविभागः कृतः स्यात् तदनुसारं कार्यक्रमान्, नूतनपरियोजनाः, सम्मेलन-संगोष्ठी-कार्यशालाः समायोजयितुं



NOTARY S.K. Sharma Advocate Delhi GOVT. OF INDIA
Research For Resurgence Foundation (RFRF) NAGPUR
R.K. Raman
Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

दायित्ववन्तौ स्तः। यत्र क्वचिदपि वित्तीयविषयः समायाति तत्र उमावपि सहमत्या प्रत्येकं कार्यक्रमाय योजनां निर्माय संसाधननियोजने व्यवस्थापने सङ्ग्रहे च व्यक्तिशः प्रवर्तिष्येते।

## ६.२. कार्यभारः

कश्चिदपि पक्ष एतदनुबन्धीयस्वकर्तव्यम् अपरपक्षीयपूर्वानुमोदनमन्तरा तृतीयव्यक्तये संस्थायै वा नैव समर्पयिष्यति। प्रत्येकम् अतिरिक्तक्रियाकलापाय एको विशिष्टोऽनुबन्धो विधास्यते।

## ६.३.संशोधनम्

अस्मिन् किञ्चिदपि परिवर्तनं, परिवर्धनं, संशोधनं वा तावत्पर्यन्तं मान्यं बाध्यकारि च न भविष्यति यावत्पर्यन्तम् उभाभ्यां पक्षाभ्यां लिखितं हस्ताक्षरितं च न स्यात्।

## ६.४. प्रावधानस्यानैकान्तिकत्वम्

एतदनुबन्धीयसहयोगक्षेत्राणि अनैकान्तिकतयैव गृहीतानि सन्तीत्यस्मिन्नंशे उभौ पक्षौ सहमतौ स्तः। अतः कश्चिदपि पक्षो भारते अथवा अन्यत्रापि तृतीयादिपक्षैः सह उभयपक्षसहमतक्षेत्रेऽपि संविदं कर्तुं कार्यं च कर्तुं स्वतन्त्रोऽस्ति।

## ६.५. गोपनीयता सार्वजनिकघोषणा च

६.५.१.गोपनीयसूचनायाः अयमर्थो यत् संविज्ज्ञापकान्तर्गतत्वेन शोधकर्तृस्थानीयः पक्षः अपरस्य शोधकर्तृपक्षस्य गोपनीयतां प्रभुत्वं तद्व्यापारसम्बद्धाप्रकटितसूचनाम् अर्थात् अधोलिखितां

यथा-

NOTARY J.K. Sharma Advocate Delhi Regd. No. 1016 Expiry 17-11-2025 GOVT. OF INDIA



Research For Resurgence Foundation (RFRF) NAGPUR

R.K. Raman

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

क) मूर्तरूपसूचनाः – १. गोपनीयामाख्यायिकां/सत्यार्था संधत्ते २. कामपि गोपनीयाख्यायिकां न सहते, या च प्राप्तिकर्तृपक्षेण विज्ञाता स्यात्, अथवा उचितपरिस्थित्यनुरूपं विज्ञेयमासीत् ,या सूचना गोपनीया सत्येव सविश्वासं प्रेषिता। अथ च

ख) तद्विषये चर्चा, यद्विषये सूचनाप्रकटीकरणसमये सूचनोत्तरं वा चर्चा सम्भवति। एतत्संविज्ज्ञापकानुसारं द्वयोरपि गोपनीयसूचना गोपनीयरूपेण द्वाभ्यामपि पक्षाभ्यां स्थापयिष्यन्ते।

६.५.२.अपरपक्षस्य पूर्वलिखितसहमतिं विना कश्चिदपि पक्षः सम्बद्धो वा कस्यचिदपि सहमतानुबन्धस्य अथवा प्रस्तावितसहभागितायाः सार्वजनिकघोषणां न करिष्यति। सार्वजनिकत्वेन घोषणीयो विषयो द्वितीयानुच्छेदे चिह्नितो भविष्यति।

**६.६. अनुज्ञप्तिः बौद्धिकसंपदाधिकारश्च**

६.६.१.एतया संविदा कस्मैचिदपि पक्षाय बौद्धिकसंपदाधिकारानुसारं काचिदनुज्ञप्तिर्नैव दास्यते। उभौ पक्षौ जानीतः स्वीकुरुतश्च यत् एतादृशानुज्ञप्तिः सर्वदा लिखितरूपेणैव भवतीति।

६.६.२.उभौ पक्षौ कार्यकलापेभ्यो निष्पन्नानाम् अथवा पक्षाभ्यां प्रकटीकृतानां ज्ञानाभिलेखादिबौद्धिकसंपदां रक्षणाय सर्वविधपद्धतीरवलम्बिष्येते।

**६.७. हितसंघर्षः**

अनया संविदा निर्धारितसहयोगविषयैर्वास्तविकतया आहोस्वित् संभावितत्वेन कस्यचिद् हितस्य संघर्षः उत्पत्स्यते इति न कश्चित् पक्षो मन्यते। संविदियम् (सम्बद्धानुबन्धाश्च) अतीत-वर्तमान-सम्भावितभविष्यद्व्यवस्थाभ्यः स्वतन्त्रा वर्तते, अथ च कस्यचित् पक्षस्य वर्तमानव्यावसायिकसंबन्धेन युक्ता नास्तीति विषये उभौ पक्षौ सहमतौ स्तः।

NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA



Research For Resurgence Foundation (RFRF) NAGPUR

R.K. Bam

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 * Under MHRD, Govt. of India *

**अनुच्छेदः-७ समाप्तिः**

७.१.यदा केनचित् पक्षेण लिखितरूपेण मासिकावधियुता समाप्तिसूचना प्रकाश्येत तदा कस्यचित् पक्षस्य दायित्वमन्तरैव इयं संवित् समाप्ता भविष्यति।

**७.२. उत्तरजीवितं बन्धनप्रकृतिश्च**

७.२.१. अस्य संविज्ञापकस्य षष्ठमनुच्छेदं (६ नियमेन संबद्धम्), सप्ममममनुच्छेदं (७ समाप्तिसम्बद्धम्), अष्टममनुच्छेदं (८ विवादोपशमसम्बद्धम्) च विहाय अन्ये सर्वे विषयाः कस्यापि पक्षस्य विधिबलेन बाधकस्थाने स्थापनोद्देश्येन तदर्थमङ्गीकरणाभिप्रायेण वा नैव कल्पिताः, नैवानुमन्यन्ते च।

७.२.२. अस्मिन् संविज्ञापके क्वचिदपि पूर्वनिर्धारितान् विचारान् विहाय षष्ठः अनुच्छेदः (नियमेन सम्बद्धः), सप्तमः अनुच्छेदः (समाप्तिसम्बद्धः), अष्टमः अनुच्छेदः (विवादोपशमसम्बद्धः) च संवित्समाप्तौ, संवित्समाप्त्युत्तरमपि अवशिष्यते।

NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA

**अनुच्छेदः-८ विवादोपशमः**

**८.१.शासकीयविधिः अधिकारक्षेत्रञ्च**

८.१.१. संविदियं भारतगणराज्यस्य विधिशास्त्रेण शासितं तदधीनञ्चास्ति। अनया संविदा उत्पत्स्यमाना विवादाः तत्सम्बद्धविवादाश्च असीमाङ्किताः सर्वे भारतस्य विधिशास्त्रानुगुणं विध्यविरोधेन शासिता, व्याख्याता, अवगताश्च भविष्यन्ति।

८.१.२.अस्याः संविदो विषये तत्सम्बद्धविषये च उत्पत्स्यमानाः सर्वविधविवादा मतभेदाश्च सर्वादौ उभाभ्यामपि पक्षाभ्यां संयुज्य नियुक्तानां मध्यस्थस्थानीयानां त्रयाणां समक्षमुपस्थापयिष्यन्ते। मध्यस्थैः निर्धारिता निर्णया घोषणाश्च द्वयोरपि पक्षयोः कृते अन्तिमाः अभ्युपगन्तव्याश्च भविष्यन्ति। मध्यस्थनिर्धारणन्तु 'मध्यस्थता परिहाराधिनियमश्च (१९९६)' इत्येतदनुसारं भविष्यति। मध्यस्थानां माध्यमभाषा हिन्दी, संस्कृतम्, आङ्ग्लभाषा, तदितरा च या काऽपि



Research For Resurgence Foundation (RFRF) NAGPUR

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

भारतीयभाषा भविष्यति। मध्यस्थतावहनस्थानं नागपुरम् आहोस्वित् नवदेहली भविष्यति।

## ८.२. सूचनापत्रम्

अस्मिन् सर्वे सञ्चारव्यवहारा लिखितरूपेण भविष्यन्ति। यदि वैयक्तिकरूपेण पञ्जीकृततया वितीर्यन्ते अथवा प्रमाणितवैद्युतिकसंकेतेन पक्षयोरधोनिर्दिष्टसंकेते प्रेष्यन्ते तदा ताः सूचना दत्ता इति मन्येरन्।

आरएफआरप्रतिष्ठानस्य कृते चेत्।

प्रति- सचिवः

संकेतः- रिसर्च फार रिसर्जेंस् फाउण्डेशन, शेषाद्रिसदनम् ,महल तुलसीदासमार्गः, नागपुरम् , महाराष्ट्रम्-४४००३२ , भारतम्

दूरवाणी- ९८२२७४५७६८ , ९४२२८२२७९५

वैद्युतसंकेतः info@rfrfoundation.org, rfrfbharat@gmail.com

वैद्युतकेन्द्रम्- (Website):- www.rfrfoundation.org

केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कृते चेत्

प्रति- कुलसचिवः

सङ्केतः- केन्द्रीय-संस्कृत-विश्वविद्यालयः, 56-57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-110058, भारतम्

दूरवाणी- 011-28520979

वैद्युतसंकेतः- pa2registrar@csu.co.in

वैद्युतकेन्द्रम्- (Website):- www.sanskrit.nic.in

NOTARY J.K. Sharma Advocate Delhi Expiry 17-11-2025 GOVT. OF INDIA



Research For Resurgence Foundation (RFRF) NAGPUR

Central Sanskrit University, Delhi 56-57, Institutional Area, Janakpuri, New Delhi-58 Under MHRD, Govt. of India

5336
Notary Register Entry No.
Date.....................

सांविदीयं पत्रावली उभाभ्यामपि पक्षाभ्यां साक्षिणोः पुरतः 21 दिने मई मासे 2022 वर्षे च हस्ताक्षरिता मुद्राङ्किता च सती वितीर्यते।

2 1 APR 2022

| आरएफआरप्रतिष्ठानम्, नागपुरम् | केन्द्रीय-संस्कृत-विश्वविद्यालयः, नवदहेली |
|---|---|
| हस्ताक्षरम् ........ | हस्ताक्षरम् ........ R. K. Barman 21.04.2022 |
| नाम राजेंद्र पाठक | नाम Prof. Ranjit Kumar Barman<br>Registrar (I/c)<br>Central Sanskrit University<br>56-57, Institutional Area,<br>Janakpuri, New Delhi - 110058 |
| पदम् अध्यक्ष | पदम् |

ATTESTED
Notary Public, Delhi

NOTARY
J.K. Sharma
Advocate
Delhi
Expiry 17-11-2025
GOVT. OF INDIA

**साक्षिणोः सान्निध्ये**

2 1 APR 2022

| | | |
|---|---|---|
| 1. | हस्ताक्षरम् ........<br>नाम DEVENDRA-PANWAR<br>पदम् Trustee | हस्ताक्षरम् ........ प्रो. बनमाली बिश्वाल<br>Prof. Banamali Biswal<br>निदेशक (शैक्षिकवृत्तम्) / Director (Academic Affairs)<br>केन्द्रीय संस्कृत विश्वविद्यालय<br>Central Sanskrit University<br>शिक्षा मन्त्रालय, भारत सरकार के अधीन<br>Under Ministry of Education, Govt. of India<br>56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058<br>56-57, Institutional Area, Janakpuri, New Delhi - 110058<br>नाम<br>पदम् |
| 2. | हस्ताक्षरम् ........<br>नाम Satyawan Meshram<br>पदम् Trustee | हस्ताक्षरम् ........ प्रो. रा. गा. मुरली कृष्ण<br>Prof. R. G. Murali Krishna<br>निदेशक (केन्द्रीय योजनाएँ) / Director (Central Schemes)<br>केन्द्रीय संस्कृत विश्वविद्यालय<br>Central Sanskrit University<br>शिक्षा मन्त्रालय, भारत सरकार के अधीन<br>Under Ministry of Education, Govt. of India<br>56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058<br>56-57, Institutional Area, Janakpuri, New Delhi - 110058<br>नाम<br>पदम् |

Research For Resurgence Foundation (RFRF) NAGPUR



Research For Resurgence Foundation (RFRF) NAGPUR

R. K. Barman

Central Sanskrit University, Delhi
56-57, Institutional Area, Janakpuri, New Delhi-58
Under MHRD, Govt. of India